International Journal of Sanskrit Research 2017; 3(6): 29-31

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 29-31
© 2017 IJSR
www.anantaajournal.com
Received: 09-09-2017
Accepted: 10-10-2017

**Dr. Shweta Bishnoi**
Govt. P.G.College Gopeshwar, Uttrakhand, India

**Correspondence**
**Dr. Shweta Bishnoi**
Govt. P.G.College Gopeshwar, Uttrakhand, India

# आध्यात्मिकोपासनायाः लाभाः

**Dr. Shweta Bishnoi**

**प्रस्तावना**

आत्मनि ईश्वरस्परूपदर्शनमेवाध्यात्मिकोपासना। एकान्तशुद्धस्थाने आसनस्थो भूत्वा, प्राणायामेन इन्द्रियनिग्रहं कृत्वा चित्ते च ईश्वरं ध्यायन् योगी उपासते। ईदृश्युपासनायाः नानाविधलाभाः वर्तन्ते।
अध्यात्मशब्देन यद्यपि आत्सम्बद्धमोक्षादय एव सङ्केतिताः तथापि शारीरिकमानसिकबौद्धिकसुखानां दुखानाञ्च प्रभाव आत्मनि दृश्यते एव अत आध्यात्मिकक्षेत्रे एतेऽपि समाविष्टाः।
शरीरमनबुद्ध्यादय उपासनासाधनानि प्रतिपाद्यन्ते अत आध्यात्मिकोपासनायाः प्रभाव आत्मना सहैव शरीरमनबुद्ध्यादिष्वपि स्वाभाविक एव। उपासनाया एते प्रभावा एवं निर्दिश्यन्ते।

**शारीरिकलाभाः**

साधनामार्गे अस्वस्थशरीरं महती बाधा वर्तते। उपासनायाः महत्प्रभावश्चापि सर्वप्रथमं शरीरे एव दृश्यते। शारीरिकव्याधिरूपान्तरायस्य प्रतिकार ईश्वरप्रणिधानेन कथितः[1] येन ज्ञायते यदुपासना शारीरिकस्वास्थ्यदात्री विद्यते। पातञ्जलयोगदर्शने उपासनायाः शारीरिकलाभा एवं वर्णिताः–

रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्।[2]

सांसारिककर्मस्वालस्यं महदन्तरायः। उपासनाप्रक्रियायां योगाभ्यासेन शरीरे लघुत्वमागच्छति येन शारीरिकस्वास्थ्यो लभ्यते। विषयवासनासंयमेन कान्तिर्वर्धते स्वरमाधुर्यञ्च प्राप्यते। एते उपासनायाः प्रारम्भिकलाभाः। उपासकस्योपरि व्याधेः, जरायाः कष्टानाञ्च कोऽपि प्रभावो न भवति–

लघुत्वमारोग्यमलोलुपत्वं
वर्णप्रसादं स्वरसौष्ठवं च।
गन्ध शुभो मूत्रपुरीषमल्पं,
योगवृत्तिं प्रथमां वदन्ति।।[3]

उपासनायां नानाव्रतपालनेन उपासकोऽपरिमितं तेजो दधाति। एतैः शारीरिकलाभैरेव मोक्षरूपं महल्लक्ष्यं साधयितुं शक्यते। इत्थं स्पष्टं यदुपासनया शारीरिककान्तिः बलश्च प्राप्येते। उपासनाप्रक्रियायां शरीरं यत्कष्टं सहते, तेन कष्टसहिष्णुत्वेन शरीरमपरिमितं तेजो दधाति अपूर्वबलान्वितञ्च जायते।

**मानसिकलाभाः**

मन एव मनुष्याणां बन्धस्य मोक्षस्य च हेतुरस्ति। कामक्रोधादयो नानाविधमानसिकभावाः मनुष्येष्वशान्तिमुत्पादयन्ति आकुलाश्चैते मर्त्याः जीवनस्य सर्वोच्चलक्ष्यप्राप्तिमार्गे पीड्यन्ते। एते मानसिकभावाः दुर्गुणानुत्पाद्य मनुष्येभ्यः क्लेशकारकाः उपासनामार्गे च बाधकाः भवन्ति। एतन्नाश एव मनोनिग्रहसाधनं मनोनिग्रहश्चोपासनया सुकरो भवति – तत्प्रतिषेधार्थमेकतत्वाभ्यासः।[4]
उपासनया कामक्रोधादयो राजसिकाः तामसिकाश्च च भावाः शाम्यन्ति एतन्मुक्तं चित्तञ्च सत्वगुणस्थितो शुचितामाप्नोति। तपस्वाध्यायेश्वरप्रणिधानेत्यादीनि उपासनायाः साधनानि समाधिं साधयन्ति। अविद्याऽऽदयो मानसिकक्लेशाः एतैरेव क्षीयन्ते– समाधिभावनार्थः क्लेशतनूकरणार्थश्च।[5] मानसिकदुर्गुणानां क्लेशानाञ्च क्षय एवोपासनायाः मानसिकलाभो विद्यते।
मनसि हिंसाविरुद्धभावः, सत्यवादिता, सन्तोष अस्तेयस्यापरिग्रहस्य च भावा उपासनाया एव प्रादुर्भवन्ति।

**बौद्धिकलाभाः**

उपासनाजन्यबौद्धिकलाभाः सात्विकबुद्धिरूपेणागच्छन्ति। उपासनावस्थायां सर्वेषामपि शारीरिकमानसिकमलानां प्रक्षालनेन स्वभावत एव बुद्धिः निर्मला भवति। यर्जुवेदे उक्तं यद्योगाभ्यासी नाडीषु ध्यायन् बुद्धिसाधनानां विकासं कुर्यात्।[7] अनेन ज्ञायते यदुपासनासाधनभूतध्यानं बौद्धिकविकासस्य साधनं वर्तते। यावद् बुद्धिः शुचितां न एति, तावदुपासना अशक्यैव। इत्थं स्पष्टं यद् उपासनायै पवित्रबुद्धिरावश्यकीया उपासनया च सा उत्तरोत्तरं पूततरैव जायते। उपासनाप्रक्रियायां साधक ईश्वरसान्निध्यमनुभवति येन तस्मिन् दिव्यगुणाः समाविशन्ति अत्रास्मिन्काले च तस्य बुद्धिर्विकसति। ईश्वरचिन्तने लीनाय तस्मै सर्वेऽपि दुष्टभावाः त्याज्याः। ईश्वरस्य स्वरूपं शुद्धं तदैव च उपासकस्य बुद्धिरनुसरति। सामवेदे उक्तं यत् पूतयन् स परमात्मा उपासकस्य बुद्धिं शोधयति आनन्दरूपस्रोतप्रवाहेन च तं पौनःपुन्येन सत्वगुणेन सह संयोज्य सन्मार्गमुपदिशति।[8] उपासनयैव सत्यासत्यविवेकरूपबुद्धिप्राप्तिः शक्यते, " उदिता यो निदिता वेदिता वस्वा यशियो ववतेति। दुष्टरा यस्य प्रवणे तोर्मयो धिया वाजं सिषासतः।।"[9] योगसाधनया ऋतम्भराबुद्धिर्जायते, यथा निर्दिष्टं पतञ्जलिना–ऋतम्भरा तत्र प्रज्ञा।[10]

**आत्मिकलाभाः**

उपासनायाः माहात्म्यं तस्याः आत्मिकलाभानां दृष्ट्यैव सर्वाधिकं वर्तते। जीवात्मनः सर्वविधदुःखानां मूलरूपेणाविद्या विद्यते उपासना च अविद्यां विनश्य जीवात्मने सुखं प्रददाति। उपासनया प्राप्तेन ब्रह्मविषयकज्ञानेन सर्वाण्यपि बन्धनानि क्षीयन्ते येन आत्मनो मोक्षः सुलभो जायते। आत्मनो येऽपि क्लेशाः विद्यन्ते तेषां सर्वेषामपि नाशो ध्यानेन शक्यः[11] क्रियायोगेनापि च ते नश्यन्ति।[12] उपासनया प्रहृष्टः परमात्मा उपासकेभ्यः सुखदाता, आनन्दस्वरूपप्रकाशको, मुक्तिदायको ज्ञानदाता च भवति।[13] स परमेश्वर एव जीवात्मने आत्मिकबलं ददाति।[14] तस्मिन् प्रेमभावो निष्कामज्ञानस्य वैराग्यस्य च जनको वर्तते। भगवदुपासनया सर्वासामासक्तीनां नाशो भूत्वा हृदय आनन्दपूरितो जायते भगवत्तत्वञ्चानुभूयते। चिते आत्मस्वरूपभगवत्साक्षात्कारेण हृदयग्रन्थिर्भिद्यते, सर्वेऽपि सन्देहाः नश्यन्ति कर्मबन्धश्च क्षीयते सहैव च आत्मप्रसादोऽपि प्राप्यते। अयमात्मिकप्रसाद एवोपासनाया आत्मिकलाभः प्रतिपादितः।

**उपासनया प्राप्यसिद्धयः**

महर्षिपतञ्जलिना संयमो विभूतिसाधनमुक्तम्। धारणायाः, ध्यानस्य समाधेश्च संयुक्तस्वरूपं संयम इत्यभिधीयते। अनेन संयमेन भूतभविष्यज्ञानं सहैव स्वस्य परेषाञ्चपि पूर्वजन्मनां ज्ञानं भवति। नानास्थानेषु संयमेन नानाविधसिद्धयः पातञ्जलयोगदर्शने वर्णिताः।[15] पंचमहाभूतसंयमानन्तरमणिमाऽऽदयोऽष्टसिद्धयः प्रादुर्भवन्ति।[16] एता अष्टसिद्धय इत्थं निर्दिश्यन्ते –

> अणिमालघिमाचैवमहिमाप्राप्तिरेव च।
> प्राकाम्यं च तथेशित्वं वशित्वं च तथापरम्।।[17]

संयमेनान्यसिद्धयोऽपि कथिताः – ततः प्रतिभाश्रावणवेदनादर्शास्वादवार्ता जायन्ते। [18] आदर्शेन दिव्यरूपम्, आस्वादेन दिव्यरसो वार्तया च दिव्यगन्धोऽनुभूयते।

**उपासनया स्वर्गप्राप्तिः**

ऐतरेयब्राह्मणे स्वर्गलोक इत्थमिग्तिः –

> परो वा अस्मांल्लोकात् स्वर्गो लोकः।[19]

मृत्योरनन्तरं स्वकर्मानुसारमेव जीवात्मने दण्डः पुरस्कारो वा विहितः।[20] अयं पुरस्कार एव स्वर्गः कथ्यते। केषाञ्चित् मतेन स्वर्गः पृथिव्याः दूरं किमप्यन्यस्थानमस्ति। परं महर्षिदयानन्दस्यानुसारम् अस्मिन्नेव संसारे दुःखराहित्यं सर्वतः सुखप्राप्तिश्च स्वर्गस्य स्वरूपम्। यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् अभिलाषोपनीत४च तत्सुखं स्वःपदास्पदम्। स्वर्गप्राप्तिसाधनरूपेण उपासनायाः नानाविधरूपाणि प्रतिपाद्यन्ते यथा – यज्ञदानस्तुतिपरसेवानामस्मरणसत्कर्माचरणमित्यादीनि। अथर्ववेदे स्वर्गाधिरोहणार्थं सूर्यस्य ज्योतिः, अग्निः शुद्धहविर्बलिश्च साधनरूपेण कथिताः।[21] ऋग्वेदेऽपीत्थमेव परिकीर्तितम्।[22]
स्वर्गः सर्वत्रैव उपासनकर्मणां शुभफलप्राप्तिरूपेण प्रतिपादितः।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहु ः।

**उपासनया अमृतत्वप्राप्तिः**

अस्मिन्संसारे मिथ्याज्ञानमेव दुःखमूलम, अस्य मिथ्याज्ञानस्य निवृत्त्यनन्तरमेव मोक्षः प्राप्यते।[23] अविद्याजन्येभ्यो मोहशोकरागादीभ्यो मुक्तिरपि मोक्षपदवाच्यः।
वायुपुराणे जीवब्रह्मैक्यं मोक्षरूपेण प्रतिपादितम्।[24] योगदर्शने कथितं यन्महत्तत्वादीनां स्वकारणे लय आत्मनो वा स्वस्य स्वरूपे स्थितिरेव मोक्षः।[25]
अस्य मोक्षस्य साधनरूपेण ज्ञानयोगकर्मयोगाष्टाबयोगभक्त्यादयः कथिताः। उपनिषत्सु तत्वज्ञानं मोक्षस्यान्यतमसाधनमुक्तम् –

**तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यन्तेऽयनाय।**[26]

आत्मनः परमात्मनश्च स्वरूपज्ञानेन जीवात्मने अमृतभावप्राप्तिः उपपद्यते।[27] गीतायामस्य मोक्षस्य प्राप्तिः कर्मयोगेन कथिता।[28] श्वेताश्वरोपनिषदपि कर्मयोगेन परमात्मप्राप्तिं वदति।

> आरभ्य कर्माणि गुणान्वितानि, भावांश्च सर्वान् विनियोजयेदयः।
> तेषामभावे कृतकर्मनाशः कर्मद्वाये याति स तत्वतोऽन्यः।।[29]

भक्तिमार्गोऽपि मोक्षं प्रति नयति। शाण्डिल्यभक्तिसूत्रे भक्तिः मोक्षप्राप्तिसाधनरूपेणेत्थं वर्णिता – भक्त्या बुद्धिरात्यन्तिकरूपेण विलीयते पराभक्तिसिद्धयवस्थाया४च शरीरनाशसहैव जीवात्मने मुक्तिलाभो भवति।[30] अष्टाबयोगेनाप्युपासकाय मोक्षलाभः कथितः।[31] ऋग्वेदादिभाष्यभूमिकायां कथितं यत् परमेश्वरोपासनया अविद्याऽऽदयः क्लेशा अधर्माचरणादयश्च दुष्टगुणाः निवार्यन्ते तेन च शुद्धविज्ञानस्य धर्मादिशुभगुणाना४च आचरणेन आत्मोन्नतिर्भवति यया जीवो मुच्यते।।[32] उपासनया साधकस्य देहे विशिष्टतमं तेज आदधाति येन तस्य कान्तिर्देवानप्यतिक्रामति। इयमेव उपासना तन्मनसि शान्तिं बुद्धौ च शुचितां प्रतिष्ठापयति येन साधक उत्तरोत्तरमधिकमेवोपासनाकर्मणि लीयते स्वस्य कृते च मोक्षद्वारमनावृतं करोति। उपासनया तदात्मनि बलं निर्वेदश्च जायेते प्रसादगुणेन चायमात्मा व्याप्यते। ये रागद्वेषादिविमुक्ताः बुद्धिमन्तश्च सन्ति, तैस्त्वियमुपासना अमृतत्वप्रदात्री भवति यल्लब्ध्वा तेषां केभ्योऽपि सांसारिकभोगेभ्य ईहा न प्रवर्तते। स्पष्टमेव यदुपासना इहलौकिकानामपि च सुखानां साधनं वर्तते।

**सन्दर्भाः**


1. पात४जलयोगदर्शनम्, महर्षि पतञ्जलि, टीका श्री हरिकृष्णदास गोयन्दका, – 1/28–29 गीताप्रेस गोरखपुर (सं 2052)
2. तदेव – 3/46
3. श्वेताश्वरोपनिषद् – 2/3
4. पात४जलयोगदर्शनम्, महर्षि पतञ्जलि, टीका श्री हरिकृष्णदास गोयन्दका, – 1/32 गीताप्रेस गोरखपुर (सं 2052)
5. तदेव – 2/2
6. तदेव
7. यजुर्वेदः, दयानन्द संस्थान, नई दिल्ली – 12/68
8. सामवेदः, दयानन्द संस्थान, नई दिल्ली – 12/62

9. ऋग्वेदः , दयानन्द संस्थान, नई दिल्ली – 8/103/11
10. पात४जलयोगदर्शनम्, महर्षि पतळजलि, टीका श्री हरिकृष्णदास गोयन्दका, –1/48 गीताप्रेस गोरखपुर (सं 2052)
11. तदेव – 5/2/11
12. तदेव – 2/2
13. ऋग्वेदः, दयानन्द संस्थान, नई दिल्ली –1/72/1, 2, 4 1/27/4
14. त्देव – 8/69/10, अथर्ववेदः 20/92/7
15. पात४जलयोगदर्शनम्, महर्षि पतळजलि, टीका श्री हरिकृष्णदास गोयन्दका, –3/16/43 गीताप्रेस गोरखपुर (सं 2052)
16. तदेव –3/44
17. मार्कण्डेयपुराण, पं0 श्रीराम आचार्य, संस्कृति संस्थान, बरेली (सन् 1971) –32/30
18. पात४जलयोगदर्शनम्, महर्षि पतळजलि, टीका श्री हरिकृष्णदास गोयन्दका, –3/36 गीताप्रेस गोरखपुर (सं 2052)
19. ऐतरेयब्राह्मण, सायणाचार्य, काशीनाथ शास्त्री (सन् 1979 ई0) – 6/20
20. शतपथब्राह्मण, भाष्यकार बुद्धदेव, समर्पण शोधसंस्थान, गाजियाबाद –11/2/7/33 (अंक 1–सन् 1990 ई0, अंक 2– सन् 1992 ई0)
21. अथर्ववेदः, दयानन्द संस्थान, नई दिल्ली (सं0 2031) –1/9/2
22. ऋग्वेदः , दयानन्द संस्थान, नई दिल्ली –1/125/5, 10/107/2
23. न्यायदर्शनम् – 1/1/2
24. वायुपुराण – 2/42/97
25. पात४जलयोगदर्शनम्, महर्षि पतळजलि, टीका श्री हरिकृष्णदास गोयन्दका, –4/34 गीताप्रेस गोरखपुर (सं 2052)
26. श्वेताश्वरोपनिषद् – 6/15
27. त्देव – 1/16
28. श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुर – 5/5
29. श्वेताश्वरोपनिषद् – 6/4
30. शाण्डिल्यभक्तिसूत्र, भाष्य स्वप्नेश्वर, श्री वेंकटेश्वर प्रेस, मुम्बई ( सं0 2055)– 96,97
31. श्वेताश्वरोपनिषद् – 2/8–15
32. ऋग्वेदादिभाष्यभूमिका, स्वामी दयानन्द सरस्वती, आर्ष साहित्य प्रचार ट्रस्ट,– 139 नई दिल्ली (सन् 1998 ई0)